22 १,०६२.०१ प्र मन्महे शवसानाय शूषमाङ्गूषं गिर्वणसे अङ्गिरस्वत् । ८,०७४.०१ अग्निं वो दुर्यं वच स्तुषे शूषस्य मन्मभिः ॥ १०,०१२.०८ यस्मिन्देवा मन्मनि संचरन्त्यपीच्ये न वयमस्य विद्म । ३,०२६.०७ अग्निरस्मि जन्मना जातवेदा घृतं मे चक्षुरमृतं म आसन् । अर्कस्त्रिधातू रजसो विमानोऽजस्रो घर्मो हविरस्मि नाम ॥

भूरिकर्मणे वृषभाय वृष्णे सत्यशुष्माय सुनवाम सोमम्। where both वृषभाय and वृष्णे are used. See the Jamison translation of ६,०६८.११ इन्द्रावरुणा मधुमत्तमस्य वृष्णः सोमस्य वृषणा वृषेथाम् । (O Indra and Varuṇa, you bulls—drench yourselves in the most honeyed, bullish soma). it should have been as follows- hey! You bulls! Bull the soma bull, if vrs is taken literally. square bracket mine) how nonsense it is?.

Second half is quite clear like the first Mantra.

### Mantra 4

**१,१५४.०४ यस्य त्री पूर्णा मधुना पदान्यक्षीयमाणा स्वधया मदन्ति ।**

**१,१५४.०४ य उ त्रिधातु पृथिवीमुत द्यामेको दाधार भुवनानि विश्वा ॥**

Jamison- Whose three <u>steps</u>, <u>filled with honey</u>, never becoming depleted, find elation through their own <u>power</u>, who alone supports heaven and earth in <u>their three parts</u> and all living beings.
Griffit- Him whose three places that are filled with sweetness, imperishable, joy as it may list them, Who verily alone upholds the threefold, the earth, the heaven, and all living creatures

**मधुना पूर्णानि त्रीणि पदानि**

What is the madhu?

१,०१३.०२ मधुमन्तं तनूनपाद्यज्ञं देवेषु नः कवे । here yajna is madhumat

१,०१३.०३ मधुजिह्वं हविष्कृतम् ॥ madhu is in toungue

१,०१५.११ अश्विना पिबतं मधु दीद्यग्नी शुचिव्रता । Hey Asvins! Drink madhu

१,०२२.०३ या वां कशा मधुमत्यश्विना सूनृतावती । Here kasaa (whipping rope, Baarukolu in kannada) is madhumat

१,०२८.०८ इन्द्राय मधुमत्सुतम् ॥ suta is madhumat

१,०४७.०१ अयं वां मधुमत्तमः सुतः सोम ऋतावृधा। soma is madhumat

१,०४७.०३ अश्विना मधुमत्तमं पातं सोममृतावृधा । soma is madhumat

१,०७८.०५ अवोचाम रहूगणा अग्नये मधुमद्वचः । here word is madhumat

१,०८७.०२ श्चोतन्ति कोशा उप वो रथेष्वा घृतमुक्षता मधुवर्णमर्चते ॥ Ghrta is madhu-colored

१,०९०.०६ मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः। १,०९०.०६ माध्वीर्नः सन्त्वोषधीः॥

१,०९०.०७ मधु नक्तमुतोषसो मधुमत्पार्थिवं रजः। १,०९०.०७ मधु द्यौरस्तु नः पिता॥

१,०९०.०८ मधुमान्नो वनस्पतिर्मधुमां अस्तु सूर्यः । १,०९०.०८ माध्वीर्गावो भवन्तु नः[23] ॥ Everything brings forth madhu here in this mantra.

How all these things can produce/bring forth honey if we take word madhu to mean honey? This is something un-understandable. Hence it should mean something that is sweet. Word can be sweet, Son can be sweet, Amrta cab be sweet, so on, so forth.

**How Visnu's three feet are filled with madhu?**

That is the high question we have to address now. Three vikramanas of Visnu are explained earlier. What are these padas now? How can Visnu have three legs? What are these three padas?

Rk १०,०९०.०३ पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥ १०,०९०.०४ त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत्पुनः।[24] gives answer- this Purusa has four paadas. One paada is here and other three are in Div.

Rk ४,०५८.०३ चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य। त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आ विवेश ॥ speaks of three paadas of Visnu (in Ghrtasuukta).

This is found also in Rk. ३,०५५.१० विष्णुर्गोपाः परमं पाति पाथः प्रिया धामान्यमृता दधानः। where Visnu is said to be having अमृतानि धामानि. These अमृतानि धामानि are his paadas. स विष्णुस्त्रेधात्मानं न्यधत्त पृथिव्यां तृतीयमन्तरिक्षे तृतीयं दिवि तृतीयम् (तै.सं.2.4.12) supports this meaning.

Bhaagavata further clarifies these three

यो वा अहं च गिरिशश्च विभुः स्वयं च स्थित्युद्भवप्रलयहेतव आत्ममूलाः ।
भूत्वा त्रिपाद्ववृध एक उरुप्ररोहस्तस्मै नमो भगवते भुवनद्रुमाय ॥ Bhaagavata ०३.०९.०१६ ॥
प्रादुष्कृतानां मायानामासुरीणां विनाशयत्।
सुदर्शनास्त्रं भगवान् प्रायुङ्क्त दयितं त्रिपात् ॥ Bhaagavata ०३.१९.०२२ ॥

"अनन्तासनवैकुण्ठक्षीराब्धिस्थो हरिस्त्रिपात्' इति च ।।16।। (Madhvaacarya comm. on above)
अमृतम् क्षेमम् अभयम् इति स्वरूपांशत्रयवान् (प्रकाशिका commentary on above passage)

---

23 ६,०११.०३ वेपिष्ठो अङ्गिरसां यद्ध विप्रो मधु च्छन्दो भनति रेभ इष्टौ ॥

24 This is echoed in Chaandogya सैषा चतुष्पदा षड्विधा गायत्री तदेतदृचाभ्यनूक्तम् ।।5।।

तावानस्य महिमा ततो ज्यायां?श्च पूरुषः । पादोस्य सर्वा भूतानि त्रिपादस्यामृतं दिवीति ।।6।। छांदोग्य. This is also found in अमृतस्य पूर्णान्तामु कलां विचक्षते। पादं षड्ढोतुर्न किलाविविथ्से। ( तै. आ. 3.1.1.5)

Hari has got three forms in अनन्तासन वैकुण्ठ and क्षीराब्धि. These three forms are called अमृतम् क्षेमम् अभयम्. That is how he is called tripaat.[25]

८,०२९.०७ त्रीण्येक उरुगायो वि चक्रमे यत्र देवासो मदन्ति ॥ also supporst us. अस्यापि विष्णुः त्रिभिः पदैः त्रीणि भुवनानि विचक्रमे येषु पदेषु देवाः सुखमनुभवन्ति इत्यर्थः। Hence it is one Samaakhyaa (same-worded support). ९,१०३.०२ त्री षधस्था पुनानः कृणुते हरिः ॥[26] Here again there is mention of three sadhasthas which Hari sanctifies.

**स्वधया मदन्ति**

What is this svadhaa? It is sukha.[27] There are numerous occurrences of this combination in Rgveda.[28] १,१०८.१२ यदिन्द्राग्नी उदिता सूर्यस्य मध्ये दिवः स्वधया मादयेथे। ३,००४.०७ दैव्या होतारा प्रथमा न्यृञ्जे सप्त पृक्षासः स्वधया मदन्ति।

मदन्ति to feel happy. मदी हर्षग्लेपनयोः भ्वादिः, मदति मदयति[29]

**त्रिधातु**

What is this tridhaatu? Jayatiirtha comments on it (TP on BSB 1.1.2) प्रकृति-पुरुष-कालधारकः विष्णुः. It may also mean "in all three times" as himself he interpreted this word in १,०३४.०७ त्रिर्नो अश्विना यजता दिवेदिवे परि त्रिधातु पृथिवीमशायतम् ।[30]

Mantra 5

**१,१५४.०५ तदस्य प्रियमभि पाथो अश्यां नरो यत्र देवयवो मदन्ति ।**

**१,१५४.०५ उरुक्रमस्य स हि बन्धुरित्था विष्णोः पदे परमे मध्व उत्सः ॥**

---

25 अथ वा त्रिपाद्रूपी भगवान् दिव्यपुरुषस्त्रिविक्रमोऽस्य देवता । तत्प्रतिपादकगायत्रीभाष्यत्वात् । (वि.त.नि.टी.टिप्पणी लघुप्रभा व्यासतत्त्वज्ञकृता)

26 ८,००८.२३ त्रीणि पदान्यश्विनोराविः सान्ति गुहा परः । this might be indicating same thing.

27 तदेकं सर्वोत्तमं ब्रह्म अवातं वातप्रेरणया विनैव स्वधया सुखेनैव, न तु सुखप्राप्त्याद्यर्थं आनीदचेष्टतेति श्रुत्यर्थः। (जयतीर्थ in तत्त्वोद्द्योतटीका)

28 ४,०५८.०४ इन्द्र एकं सूर्य एकं जजान वेनादेकं स्वधया निष्टतक्षुः ॥

29 मद तृप्तियोगे of which many popular forms like मादयते, मादयस्व, अमीमदन्त, मादयन्ताम् are derived, is different root though popular in veda.

30 MBh12237029 दैवं त्रिधातुं त्रिवृतं सुपर्णं; ये विदुयुरग्र्यं परमार्थतां च। ते सर्वलोकेषु महीयमाना; देवाः समर्थाः सुकृतं व्रजन्ति।। However I am not sure of the meaning of this verse.

Jamison- Might I reach that dear cattle-pen of his, where men seeking the gods find elation, for exactly that is the bond to the wide-striding one: the wellspring of honey in the highest step of Viṣṇu.
Griffit- May I attain to that his well-loved mansion where men devoted to the Gods are happy. For there springs, close akin to the Wide-Strider, the well of meath in Visnu's highest footstep.

Here is the corresponding text from Taittiriya "त्रीणि पदा विचक्रमे । विष्णुर्गोपा अदाभ्यः । ततो धर्माणि धारयन् ।। ब्रा॥२।४।६।१ ।। तदस्य प्रियमभि पाथो अश्याम् । नरो यत्र देवयवो मदन्ति । उरुक्रमस्य स हि बन्धुरित्था । विष्णोः पदे परमे मध्व उथ्सः । क्रत्वा दा अस्थु श्रेष्ठः । अद्य त्वा वन्वन्थ्सुरेक्णाः । मर्त आनाश सुवृक्तिम् । इमा ब्रह्म ब्रह्मवाह । प्रिया त आ बर्हिः सीद । वीहि सूर पुरोडाशम् ।। तै. ब्रा॥२।४।६।२ ।।"

**प्रियं पाथः Visnu's dear cattle-pen?**

Jamison has interpreted प्रियं पाथः as "dear cattle-pen" that means an enclosure for confining livestocks. How does this cattle pen become dear for Visnu? Why do there go men seeking the gods to find elation? Why should men go to the cattle-pen? Are they cattle to find elation there? Are they cowherd people? Is any cattle penning found in this verse?. Or Visnu a cattle breeder? It is totally meaningless. It is absurd.
१,१८८.१० उप त्मन्या वनस्पते पाथो देवेभ्यः सृज। अग्निर्हव्यानि सिष्वदत्॥ does this mantra speak of creating cattle-pen for Gods? What about ७,०३४.१० आ चष्ट आसां पाथो नदीनां वरुण उग्रः सहस्रचक्षाः॥ which speaks of pathas of rivers? How cattle-pen related to rivers? If it means something different in those contexts, then it can be different here also. It is water mentioned here in both sentences. ३,०५५.१० विष्णुर्गोपाः परमं पाति पाथः प्रिया धामान्यमृता दधानः। this Rk too is important in deciding in the meaning of this verse.

३,००८.०९ हंसा इव श्रेणिशो यतानाः शुक्रा वसानाः स्वरवो न आगुः ।

३,००८.०९ उन्नीयमानाः कविभिः पुरस्ताद्देवा देवानामपि यन्ति पाथः ॥

७,०४७.०३ शतपवित्राः स्वधया मदन्तीर्देवीर्देवानामपि यन्ति पाथः ।

Both these mantras speak of pathas of Gods. This corroborates with our context. All these creatures or men are going towards the akaasagangaa that is Visnupadii.

७,०९१.०२ उशन्ता दूता न दभाय गोपा मासश्च पाथः शरदश्च पूर्वीः ।

**अश्याम्**

अश्याम् (आशीर्लिङ् उत्तमपुरुषैकवचनम्) it is derived of root अश भोजने. And certainly not अशू व्याप्तौ संघाते च. Then it should be अशिषीय (आशीर्लिङ् उत्तमपुरुषैकवचनम्). Thence, this form cannot mean "reaching", it is eating of something. १,१७८.०१ मा नः कामं महयन्तमा धग्विश्वा ते अश्यां पर्याप आयोः ॥ means the same thing "I take your water". ३,०५४.२१ भगो मे अग्ने सख्ये न मृध्या उद्रायो अश्यां सदनं पुरुक्षोः॥ ("रायो अश्याम्" "I enjoy riches") supporst this.

**देवयवः**

Who is devayu? देवं देवभावमात्मन इच्छतीति देवयुः men who want to be gods. Hence Mantra means that "I drink the water that has been poured (अभि) on Visnu, (or I reach towards the Akaasagangaa river which has come from the feet of Trivikrama) where (by which) men who want to be gods experience happiness".

७,०९७.०१ यज्ञे दिवो नृषदने पृथिव्या नरो यत्र देवयवो मदन्ति। supports this meaning.

This is explained in Visnupuraana

ततः प्रभवति ब्रह्मन् सर्वपापहरा सरित् ।
गङ्गा देवाङ्गनाङ्गानामनुलेपनपिञ्जरा ॥ २,८.१०८ ॥
वामपादाम्बुजाङ्गुष्ठनखस्रोतोविनिर्गताम् ।
विष्णोर्बिभार्ति यां भक्त्या शिरसाहर्निशं ध्रुवः ॥ २,८.१०९ ॥
ततः सप्तर्षयो यस्याः प्राणायामपरायणाः ।
तिष्ठन्ति वीचिमालाभिरुह्यमानजटाजले ॥ २,८.११० ॥ (विष्णुपुराणे)

It should be be made clear as to who are the people elated clearly.

Bandhu of Urukrama

तदस्य प्रियमभि पाथो अश्यां नरो यत्र देवयवो मदन्ति ।

उरुक्रमस्य स हि बन्धुरित्था विष्णोः पदे परमे मध्व उत्सः ॥

Bandhu is the bound. The person who has some binding is bandhu of us. It is same for wife, son, father etc. everybody has some kind of binding with us. Here it is being stated that the very spring of sweet water (Akaasagangaa) that has originated from the feet of Visnu is the bond to Visnu himself (From this water one can reach the feet of Visnu).

Elsewhere Visnu is extolled as the Bandhu and Setu of good people, who want to be liberated. Both the roots of words have same meaning.

८,०२१.०४ वयं हि त्वा बन्धुमन्तमबन्धवो विप्रास इन्द्र येमिम ।

१०,१२९.०४ सतो बन्धुमसति निरविन्दन्हृदि प्रतीष्या कवयो मनीषा ॥

उप प्रागाथ्सुमन्मेऽधायि मन्म देवानामाशा उप वीतपृष्ठः ।

अन्वेनं विप्रा ऋषयो मदन्ति देवानां पुष्टे चकृमा सुबन्धुम् ।। (तै.सं.4.6.41)

अन्तः प्रविष्टं कर्तारमेतम् । देवानां बन्धु निहितं गुहासु । अमृतेन क्लृप्तं यज्ञमेतम् । चतुर्होतृणामात्मानं कवयो निचिक्युः । (तै.आ.3.22)

वागेव सम्राळिति होवाच वाचा वै **सम्राळ्‌ बन्धुः प्रज्ञायत** ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानीष्टं हुतमाशितं पायितमयं च लोकः परश्च लोकः सर्वाणि च भूतानि वाचैव सम्राट्‌ प्रज्ञायन्ते ॥ 2 ॥ (Brh.up)

एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल **एष सेतुर्विधरण** एषां लोकानामसम्भेदाय (Chn-up:)

**यः सेतुरीजानानामक्षरं** ब्रह्म यत्‌ परम्‌। अभयं तितीर्षतां पारं नाचिकेतं शकेमहि .. 2.. (katha)

Madhva Utsah

There is another occurrence of it in Rgveda etc.[31]i.e. **प्रास्मै हिनोत मधुमन्तमूर्मिं गर्भो यो वः सिन्धवो मध्व उत्सः** । (ऋ.वे.१०,०३०.०८). hence this can be taken to mean spring of sweetness.

Visnoh pade parame

There is a description of Visnu's supreme feet in Rgveda and elsewhere. १,०२२.२० **तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः ।**

**सहस्रशीर्षं देवं विश्वाक्षं विश्वशंभुवम्‌ । विश्वं नारायणं देवमक्षरं परमं पदम्‌ ।** तै. आ॥०।१०।१३।२९ ।।

१०,००५.०१ **सिषक्त्यूधर्निण्योरुपस्थ उत्सस्य मध्ये निहितं पदं वेः ॥**

We find description of  Shishumaara in Rgveda and Taittiriya.
१,११६.१८ यदयातं दिवोदासाय वर्तिर्भरद्वाजायाश्विना हयन्ता । रेवदुवाह सचनो रथो वां वृषभश्च शिंशुमारश्च युक्ता ॥

भूः प्रपद्ये भुवः प्रपद्ये स्वः प्रपद्ये भूर्भुवस्स्वः प्रपद्ये ब्रह्म प्रपद्ये ब्रह्मकोशं प्रपद्येऽमृतं प्रपद्येऽमृतकोशं प्रपद्ये चतुर्जालं ब्रह्मकोशं यं मृत्युर्नावपश्यति तं प्रपद्ये देवान्प्रपद्ये देवपुरं प्रपद्ये परीवृतो वरीवृतो ब्रह्मणा वर्मणाऽहं तेजसा कश्यपस्य यस्मै नमस्तच्छिरो धर्मो मूर्धानं ब्रह्मोत्तरा हनुर्यज्ञोऽधरा विष्णुर्हृदयगं संवथ्सरः प्रजननमश्विनौ पूर्वपादावत्रिर्मध्यं मित्रावरुणावपरपादावग्निः पुच्छस्य प्रथमं काण्डं तत इन्द्रस्ततः प्रजापतिरभयं चतुर्थगं स वा एष दिव्यः शाक्वरः शिशुमारस्तगं ह य एवं वेदाप पुनर्मृत्युं जयति जयति स्वर्गं लोकं नाध्वनि प्रमीयते नाग्नौ प्रमीयते नाप्सु प्रमीयते नानपत्यः प्रमीयते लघ्वान्नो भवति ध्रुवस्त्वमसि ध्रुवस्य क्षितमसि त्वं भूतानामधिपतिरसि त्वं भूतानाग् श्रेष्ठोऽसि त्वां भूतान्युपपर्यावर्तन्ते नमस्ते नमस्सर्वं ते नमो नमः शिशुकुमाराय नमः ।।
तै.आ॥०।२।१९।२३ ।। ।। १९ ।।

---

[31] मरुत्वान् इन्द्र वृषभो रणाय पिबा सोममनुष्वधं मदाय | आ सिञ्चस्व जठरे मध्व ऊर्मिं त्वं राजासि प्रदिवः सुतानाम् || (तै.सं. १।४।१९ ||)

वाजे वाजेऽवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः || अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः || || (तै.सं. १।७।८ ||)

स प्रत्युदैद्धरुणो मध्वो अग्रग्ग् स्वायां यत्तनुवां तनूमैरयत | उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णाम्येष ते योनिः प्रजापतये त्वा ||  कोशस्तनुवां त्रयोदश च || (तै.सं. १।७।१२ ||)

इन्द्रागहि प्रथमो यज्ञियानाम् | या ते काकुथ्सुकृता या वरिष्ठा | यया शश्वत्पिबसि मध्व ऊर्मिम् | (तै. ब्रा. 2.4.३३)

This is explained in Visnupuraana

आभूतसंप्लवं स्थानममृतत्वं विभाव्यते । त्रैलोक्यस्थितिकालोयमपुनर्मार उच्यते ॥ २,८.९५ ॥
ब्रह्महत्याश्वमेधाभ्यां पापपुण्यकृतो विधिः । आभूतसंप्लवान्तन्तु फलमुक्तं तयोर्द्विज ॥ २,८.९६ ॥
यावन्मात्रे प्रदेशे तु मैत्रेयावस्थितो ध्रुवः । क्षयमायाति तावत्तु भूमेराभूतसंप्लवात् ॥ २,८.९७ ॥
<u>ऊर्ध्वोत्तरमृषिभ्यस्तु ध्रुवो यत्र व्यवस्थितः । एतद्विष्णुपदं दिव्यं तृतीयं व्योम्नि भासुरम् ॥ २,८.९८ ॥</u>
निर्धूतदोषपङ्कानां यतीनां संयतात्मनाम् । स्थानं तत्परमं विप्र पुण्यपापपरिक्षये ॥ २,८.९९ ॥
अपुण्यपुण्योपरमे क्षीणाशेषाप्तिहेतवः । यत्र गत्वा न शोचन्ति तद्विष्णोः परपं पदम् ॥ २,८.१०० ॥
धर्मध्रुवाद्यास्तिष्ठन्ति यत्र ते लोकसाक्षिणः । तत्साष्टर्योत्पन्नयोगर्धिस्तद्विष्णोः परमंपदम् ॥ २,८.१०१ ॥
यत्रोतमेतत्प्रोतं च यद्भूतं सचराचरम् । भव्यं च विश्वं मैत्रेय तद्विष्णोः परमं पदम् ॥ २,८.१०२ ॥
दिवीव चक्षुराततं योगिनां तन्मयात्मनाम् । विवेकज्ञानदृष्टं च तद्विष्णोः परमं पदम् ॥ २,८.१०३ ॥
यस्मिन्प्रतिष्ठितो भास्वान्मेढीभूतः स्वयं ध्रुवः । ध्रुवे च सर्वज्योतींषि ज्योतिष्वम्भोमुचो द्विज ॥ २,८.१०४ ॥
मेघेषु संगता वृष्टिर्वृष्टेः सृष्टेश्च पोषणम् । आप्यायनं च सर्वेषां देवादीनां महामुने ॥ २,८.१०५ ॥
ततश्चाज्याहुतिद्वारा पोषितास्ते हविर्भुजः । वृष्टेः कारणतां यान्ति भूतानां स्थितये पुनः ॥ २,८.१०६ ॥
एवमेतत्पदं विष्णोस्तृतीयममलात्मकम् । आधारभूतं लोकानां त्रयाणां वृष्टिकारणम् ॥ २,८.१०७ ॥
ततः प्रभवति ब्रह्मन् सर्वपापहरा सरित् । गङ्गा देवाङ्गनाङ्गानामनुलेपनपिञ्जरा ॥ २,८.१०८ ॥

**Hence translating parame pade as highest place of Visnu is totally wrong.**

This mantra may also mean a different anvaya "**अस्य प्रियं तत् पाथः अश्याम्, यत्र देवयवः नरः अभिमदन्ति। उरुक्रमस्य विष्णोः परमे पदे मध्वः उत्सः। इत्था स हि बन्धुः।।**" as suggested by Ramanuja Devanathan.[32] But it is unlikely considering the syntax of Veda.

**Mantra 6**

**१,१५४.०६ [33]ता वां वास्तून्युश्मसि गमध्यै[34] यत्र गावो भूरिशृङ्गा अयासः ।**

**१,१५४.०६ अत्राह तदुरुगायस्य वृष्णः परमं पदमव भाति भूरि ॥**[35]

Jamison- We wish to go to the dwelling places belonging to you two [=Viṣṇu and Indra], where there are ample-horned, unbridled cows. There that highest step of the wide-ranging bull shines down amply.

---

32 http://iksusara.blogspot.in/2015_05_01_archive.html

33 **"Poetics and pragmatics in the Vedic liturgy for the installation of the sacrificial post"** by THEODORE N. PROFERES in The Journal of the American Oriental Society, 2003, (http://www.thefreelibrary.com/Poetics+and+pragmatics+in+the+Vedic+liturgy+for+the+installation+of...-a0115966738) needs a separate critique.

34 There is a problem of samhitapaatha. Refer to तैत्तिरीयप्रातिशाख्य सोमयार्यविरचित-त्रिभाष्यरनाख्यव्याख्यया, गार्ग्यगोपालयज्वविरचित-वैदिकाभरणाख्यव्याख्यया च सहितम्

35 This Mantra is explained in Nirukta 2.7.1

Griffit- Fain would we go unto your dwelling-places where there are many-horned and nimble oxen, For mightily, there, shineth down upon us the widely-striding Bull's sublimest mansion.

In Taittiriiya Samhitaa, mantras of two suktas are found together as follows ते ते[36] धामान्युश्मसि गमध्ये गावो यत्र भूरिश्रृङ्गा अयासः। अत्राह तदुरुगायस्य विष्णोः परमं पदमव भाति भूरेः॥ विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युज्यः सखा ॥ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम् ॥ (तै.सं॥१।३।६ ।।) Hence these two suktas 1.154 and 1.22 can be clubbed to arrive at a unified sukta.

### Taa Vaam

Here वां means the two Indra-Visnu extolled in the next sukta १,१५५.०२ त्वेषमित्था समरणं शिमीवतोरिन्द्राविष्णू सुतपा वामुरुष्यति। or it may mean Yajamaana and Patni. Here Rsi claims that he wants the good dwellings for them (Indra-Visnu or patnii yajamaana) to stay.

It need not necessarily mean only "for you" but also "from you". Hence the Rsi is seeking for dwelling in Aakaasa (post death) where the big cows come.

### Gamadhyai

Or it may mean The Rsi wants to have abode in "gamadhye" (as found in TS) (which means "in the middle of Aakaasa" Ga in the sense of Kha) rather than gamadhyai which is though found[37] in other branches of Yajurveda somewhat an ambiguity, because gamadhyai can not mean "(a dwelling) to go" because nobody needs dwelling to go. One needs dwellings to stay rather.

### Usmasi

Usmasi can be both in uttama purusa and madhyama purusa as seen in the RV १,०२१.०१ इहेन्द्राग्नी उप ह्वये तयोरित्स्तोममुश्मसि। ता सोमं सोमपातमा॥ १,०२२.०६ अपां नपातमवसे सवितारमुप स्तुहि। तस्य व्रतान्युश्मसि॥

### Bhuurisrnga Gaavah

What is the significance of these two words in combination? What is the gau?

१,०१०.०८ जेषः स्वर्वतीरपः सं गा अस्मभ्यं धूनुहि ॥(ज्ञानानि सन्धूनुहि च प्रापयोच्चा अपि स्वयम् ।।8।।मध्वाचार्य)

Word "Gau" is used in the sense of jnaana here, since there is no context of cows. It has many such occurences in Rgveda in the meaning of knowledge. But this "Bhuurisrngaah" is really baffling. It has no other occurrence in Rg.

---

[36] या ते श.प.ब्रा. ३.७.१.[१५]

[37] It is the only occurrence in Rgveda.

Swami Parmeshwaranand[38] attemepted to interpret it to mean yaks generally found in higher peaks of Himalayas. However, it is baseless, considering the fact it is a matter of parama pada of Visnu, which is surely not this Himalaya.

Hence these words should mean the many branched spreading knowledge. Or the many hued dancing rays in the Parama pada of Visnu. The next line of Mantra clearly states that "Here shines the parama pada of vrsan Visnu."[39]

### Jivagosvamin's interpretation

There is different kind of commentary by Jivagosvamin on Brahmasamhita

**एवं नारदपञ्चरात्रे विजयाख्याने "तत्सर्वोपरि गोलोके श्रीगोविन्दः सदा स्वयम् । विहरेत्परमानन्दी गोपीगोकुलनायकः ॥" इति । तथा ऋक्षु चायमेव प्रदिष्टः "तां वां वास्तून्युश्मसि गमध्यै यत्र गावो भूरिश्रृङ्गा अयासः। अत्राह तदुरुगायस्य वृष्णः परमं पदमवभाति भूरि ॥" इति। व्याख्यातं च तां तानि वां युवयोः कृष्णरामयोर्वास्तूनि लीलास्थानानि गमध्यै प्राप्तुमुश्मसि कामयामहे । तानि किं विशिष्टानि ? यत्र येषु भूरिश्रृङ्गा महाश्रृङ्ग्यो गावो बहुशुभलक्षणा इति वा । अयासः शुभाः । अयः शुभावहो विधिरित्यमरः । देवास इतिवत्जसन्तं पदम् । अत्र भूमौ तल्लोके वेदे च प्रसिद्धं श्रीगोलोकाख्यमुरुगायस्य स्वयं भगवतो तच्चरणारविन्दस्य परमं प्रपञ्चातीतं पदं स्थानं भूरि बहुधा अवभातीत्याह वेद इति ।**

**यजुःसु माध्यन्दिनीया(यां) स्तूयते धामान्युश्मसि इत्यादौ । विष्णोः परमं पदमवभातीति भूरीति चात्र प्रकारान्तरं पठन्ति शेषं समानम् ॥५॥**[40]

---

[38] **Encyclopaedic Dictionary of Vedic Terms, Volume 1, Sarup and Sons, New Delhi, 2000.**

[39] As mentioned in Taittiriya.

[40] Also in Bhagavatsandarbha by Jivagosvami

यथा नानाश्रुतिपथोत्थापनेन पाद्मोत्तरखण्डेऽपि प्रकृत्यन्तर्गतविभूतिवर्णनान्तरं तादृशत्वमभिव्यञ्जितं श्रीशिवेन--
एवं प्राकृतरूपाया विभूते रूपमुत्तमम् । त्रिपाद्विभूतिरूपं तु शृणु भूधरनन्दिनि ॥
प्रधानपरमव्योम्नोरन्तरे विरजा नदी । वेदाङ्गस्वेदजनिततोयैः प्रस्राविता शुभा ॥
तस्याः पारे परव्योम त्रिपाद्भुतं सनातनम् । अमृतं शाश्वतं नित्यमनन्तं परमं पदम् ॥
शुद्धसत्त्वमयं दिव्यमक्षरं ब्रह्मणः पदम् । अनेककोटिसूर्याग्नितुल्यवर्चसमव्ययम् ॥
सर्ववेदमयं शुभ्रं सर्वप्रलयवर्जितम् । हिरण्मयं मोक्षपदं ब्रह्मानन्दसुखाह्वयम् ॥
समानाधिक्यरहितमाद्यअन्तरहितं शुभम् ॥ तेजसात्यअद्भुतं रम्यं नित्यमानन्दसागरम् ।
एवमादिगुणोपेतं तद्विष्णोः परमं पदम् ॥ न तद्भासयते सूर्यो न शशाङ्को न पावकः ।
यद्गत्वा न निवर्तन्ते तद्धाम परमं हरेः ॥ तद्विष्णोः परमं धाम शाश्वतं नित्यमच्युतम् ।
न हि वर्णयितुं शक्यं कल्पकोटिशतैरपि ॥
हरेः पदं वर्णयितुं न शक्यं मया च धात्रा च मुनीन्द्रवर्यैः । यस्मिन् पदे अच्युत ईश्वरो यः सो अङ्ग वेद यदि वा न वेद ॥
यदक्षरं वेदगुह्यं यस्मिन् देवा अधि विश्वे निषेदुः । यस्तं न वेद किमृचा करिष्यति य उ तद्विदुस्त इमे समासते ॥
तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । अक्षरं शाश्वतं नित्यं दिवीव चक्षुराततम् ॥
आ प्रवेष्टुमशक्यं तद्ब्रह्मरुद्रादिदैवतैः । ज्ञानेन शास्त्रमार्गेण वीक्ष्यते योगिपुङ्गवैः ॥
अहं ब्रह्मा च देवाश्च न जानन्ति महर्षयः । सर्वोपनिषदामर्थं दृष्ट्वा वक्ष्यामि सुव्रते ॥

## Appayya Diksitas interpretation of this mantra

‘ता वां वास्तून्युश्मसिगमध्यै गावो यत्र भूरिश्रृङ्गा अयासः । अत्राह तदुरुगायस्य वृष्णः परमं पदमवभाति भूरी’ति । अस्यार्थः---हे विष्णो ते तानि स्थानानि तच्छब्दाद्बहुवचनस्य ‘सुपां सुल्लुगि’त्यादिना शे आदेशः । ते तव धामानि स्थानानि गमध्यै गन्तुमुश्मसि इच्छामः । गमेर्धातो ‘स्तुमर्थे सेसे’ त्यादिसूत्रेण तुमुन्प्रत्ययार्थे अध्यै इति प्रत्ययः । ‘उश्मसी’ ति ‘वश कान्तौ’ इति धातोरुत्तमपुरुषबहुवचने ‘इदंतो मसी’रिति सूत्रेणान्तिम इकारादेशः । सांहितो दीर्घः । तान्येव धामानि विशेष्यन्ते । यत्र येषु स्थानेषु अयासः अनपायिन्यः यातेरसुन्प्रत्यये नञ्समासः । भूरिश्रृङ्गा गावः नन्द्यादयो गोमातरः सन्ति अत्राह अ१स्मिन्नेव स्थाने । ‘अहे’ति निपात एवकारार्थः । तत्प्रसिद्धम् । उरुगायस्य उरुभिर्महद्भिर्गीयमानस्य भूरेः महतो वृष्णः विष्णोस्तव परममधस्तनविष्णुलोकापेक्षयोत्कृष्टमवभाति अवमे भाति परमशिवलोकस्याधस्ताद्भातीति । तस्मादुमालोकान्तर्गतवैष्णवपरमपदाभिप्रायं ‘विष्णुपदसंबन्धिनी’ति ‘विष्णुपदादूर्ध्वमिति चे’ ति युज्यत एव ।।

The interpretation given by Jivagosvamin may understandable in the Vaisnava context. However interpretation of this mantra as given by Appayya Diksita is not according to context. Nowhere in context Sivaloka is mentioned to understand avabhaati as “is seen below (Paramasivaloka)” Neither there is a mention of Nandi etc. in the context.

## Conclusion

This paper shows how mis-constructed is the western tradition of Vedic Interpretation.

Hence it is very important to review the western translations periodically and show the mistakes there.

---

विष्णोः पदे परमे तु मध्य उत्सः शुभाह्वयः । यत्र गावो भूरिशृङ्गा आसते स्वसुखं प्रजाः ॥
अत्राहि तत्परं धाम गीयमानस्य शार्ङ्गिणः । तद्भाति परमं धाम गोभिर्गेयैः शुभाह्वयैः ॥
आदित्यवर्णं तमसः परस्तात्ज्योतिरुत्तमम् । आधारो ब्रह्मणो लोकः शुद्धः स ह सनातनः ॥
सामान्याावियुते दूरे अन्तेऽस्मिन् शाश्वते पदे । तस्थजुर्जागरुकेऽस्मिन् युवानौ श्रीसनातनौ ॥
यतः स्वसारा युवती भूलीले विष्णुवल्लभे । अत्र पूर्वे ये च साध्या विश्वदेवाः सनातनाः ॥
ते ह नाकं महिमानः सचन्तः शुभदर्शनाः । तत्पदं ज्ञानिनो विप्रा जातृवांसः समिन्धते ॥
तद्विष्णोः परमं पदं मोक्ष इत्यभिधीयते । तस्मिन् बन्धविनिर्मुक्ताः प्राप्यन्ते स्वमुखं पदम् ॥
यं प्राप्य न निवर्तन्ते तस्मान्मोक्स उदाहृतः । मोक्षः परं पदं लिङ्गममृतं विष्णुमन्दिरम् ॥
अक्षरं परमं धाम वैकुण्ठं शाश्वतं परम् । नित्यं च परमव्योम सर्वोत्कृष्टं सनातनम् ॥
पर्यायवाचकन्यस्य परं धाम्नोऽच्युतस्य हि । तस्य त्रिपाद्विभूतेस्तु रूपं वक्ष्यामि विस्तरात् ॥ इत्यादि ॥